# २३ त्रयोविंश दशकः - महालक्ष्म्यवतारः

रम्भस्य पुत्रो महिषासुरः प्राक् तीव्रै स्तपोभि र्द्रुहिणात्प्रसन्नात् ।
अवध्यतां पुम्भिरवाप्य धृष्टो न मे मृतिः स्यादिति च व्यचिन्तीत् ॥ २३-१॥

स चिक्षुराद्यै रसुरैः समेतः शक्रादि देवान्युधि पद्मजं च ।
रुद्रं च विष्णुं च विजित्य नाके वसन् बला द्यज्ञहवि र्जहार ॥ २३-२॥

चिरं भृशं दैत्य निपीडितास्ते देवाः समं पद्मज शङ्कराभ्याम् ।
हरिं समेत्या सुरदौष्ट्य मूचुः त्वां संस्मरन् देवि मुराररिराह ॥ २३-३॥

सुरा वयं तेन रणेऽतिघोरे पराजिता दैत्यवरो बलिष्ठः ।
मत्तो भृशं पुम्भि रवध्य भावान्न नः स्त्रियो युद्ध विचक्षणाश्च ॥ २३-४॥

तेजोभिरेका भवतीह नश्चेत् सैवासुरान् भीम बलान्निहन्ता ।
यथा भवत्येतदरं तथैव संप्रार्थयामोऽवतु नो महेशी ॥ २३-५॥

एवं हरौ वक्तरि पद्मजातात् तेजोऽभव द्राजस रक्त वर्णम् ।
शिवा दभूत्तामस रौप्य वर्णं नीलप्रभं सात्त्विक मच्युताच्च ॥ २३-६॥

तेजांस्यभूवन् विविधानि शक्र - मुखामरेभ्यो मिषतोऽखिलस्य ।
सम्योगतस्ता न्यचिरेण मातः स्त्रीरूप मष्टादश हस्त मापुः ॥ २३-७॥

तत्तु त्वमासीः शुभदे महालक्ष्मि आख्या जगन्मोहन मोहनाङ्गी ।
त्वं ह्येव भक्ताभय दानदक्षा भक्तद्रुहां भीतिकरी च देवि ॥ २३-८॥

सद्यस्त्व मुच्चै श्चकृषेऽट्टहासं सुराः प्रहृष्टा वसुधा चकम्पे ।
चुक्षोभ सिन्धु र्गिरयो विचेलुः दैत्यश्च मत्तो महिषश्चुकोप ॥ २३-९॥

त्वां सुन्दरीं चारमुखात् स दैत्यो विज्ञाय कामी विससर्ज दूतम् ।
स चेश्वरीं दैत्यगुणान् प्रवक्ता त्वां नेतुकामो विफलोद्यमोऽभूत् ॥ २३-१०॥

प्रलोभनैस्त्वा मथ देवशक्तिं ज्ञात्वाऽपि वाक्यै रनुनेतुकामः ।
एकैकशः प्रेषयति स्म दूतान् त्वां कामिनीं कर्तुमिमे न शेकुः ॥ २३-११॥

अवेहि मां पुच्छ विषाण हीनं भारं वहन्तं महिषं द्विपादम् ।
हिंसन्ति मां स्वार्थि जना स्त्वमेव रक्षाकरी मे शुभदे नमस्ते ॥ २३-१२॥

** नमस्तेस्तू महामाये श्रीपिठे सूरपुजिते ।
शंख चक्र गदा हस्ते महालक्ष्मी नमोस्तूते ॥ **